‘मनोगतम्’ [०२.१२] ‘मन की बात’ प्रसारण-तिथि: - ३१-मे, २०२०

[भाषान्तरं - सर्वश्री-डॉ.श्रुतिकान्तपाण्डेय-युवराजभट्टराई-नारायणदत्तमिश्रैः सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, नमस्कारः | कोरोना-प्रभावेण अस्माकं ‘मन की बात’ -इति मनोगतमपि प्रभावितं जातम् | यदाहं विगते क्रमे भवद्भिः साकं ‘मनोगतम् ’ सम्विभाजितवान्, तदा यात्रि-रेलयानानि स्थगितानि आसन्, बस-यानानि नैव प्रचलन्ति स्म, वैमानिकसेवाश्च पिहिताः आसन् | साम्प्रतं, एतेषु सुबहु प्रचलति, श्रमिक-विशिष्ट-रेलयानानि प्रचलन्ति, अन्यानि विशेष-रेल-यानानि अपि प्रारभन्त | सर्वविधावधानतया, विमानानि उड्डयितुम् आरभन्त, शनैः शनैः उद्योगः अपि चलितुमारभत, अर्थात्, अर्थव्यवस्थायाः अन्यतमः बृहदंशः साम्प्रतं प्रचलति, अनावृतो जातः | एतादृश्यां स्थितौ, नूनम् अस्माभिः समधिकावधानतया स्थातव्यम् | ‘दो गज़ की दूरी’-इति नियमः भवेद् वा मुखाच्छादकस्य सन्धारणं वा स्यात्, आहोस्वित्, यथासम्भवं गृहे एव स्थातव्यमिति भवेत्, एतेषां वृत्तानाम् अनुपालने न ईषदपि शैथिल्यं व्यवहरणीयम् |

देशे, सर्वेषां सामूहिक-प्रयासैः कोरोना-संक्रमणं विरुद्ध्य अतितरां दृढतया संघर्षः प्रवर्त्यते | यदा वयं विश्वं प्रति पश्यामः, तदानुभूयते यत् वस्तुतस्तु भारतवासिनां उपलब्धिः कियती महीयसी वर्तते | अस्माकं जनसंख्या अन्यदेशानां जनसंख्यापेक्षया अनेक-गुणितास्ति | अस्माकं देशे समाह्वानानि अपि भिन्न-प्रकारकाणि सन्ति, परञ्च, एवं सत्यपि अस्मदीये देशे कोरोना-संक्रमणं तावत्या गत्या प्रसरितुं नैवापारयत्, यावत्या अन्यदेशेषु इदं प्रासरत् | कोरोना-संक्रमणेन सञ्जायमाना मृत्युमितिरपि अस्माकं देशे अतितरां न्यूनास्ति |

या हानिः जाता, तया वयं सर्वे दुःखिताः स्मः | परन्तु यत् किञ्चिदपि वयं संरक्षितवन्तः, निश्चितमेव, देशस्य सामूहिक-संकल्पशक्तेः परिणामत्वेन वर्तते

| एतावति बृहति देशे, प्रत्येकमपि देशवासी, स्वयमेव, संघर्षमेनं प्रवर्तयितुं निर्णीतवान्, इदं समग्रमपि अभियानं जन-सञ्चालितमेव ।

सखायः, देशवासिनां संकल्पशक्त्या साकमेव, संघर्षेऽस्मिन् अस्मदीया अपरैका बृहत्तमा शक्तिरस्ति- सास्ति - देशवासिनां सेवाशक्तिः | वस्तुतस्तु, अस्याः महामार्याः काले, वयं भारतवासिनः इदं प्रदर्शितवन्तः यत् सेवा-त्यागयोः अस्मदीयो विचारः, न केवलम् अस्माकम् आदर्शः, अपि तु, भारतस्य जीवनपद्धतिः, तथा च, अस्माकं परम्परासु प्रोक्तमेव- 'सेवा परमो धर्मः' - सेवा स्वस्मिन्नेव सुखमस्ति, सेवायामेव सन्तोषः |

भवन्तः दृष्टवन्तः स्युः यत् अपरेषां सेवासु संलग्नानां जीवने, न कश्चन विषादः, न वा काचित् आततिः, कदाचिदपि अवलोक्यते | तस्य जीवने, जीवनविषयके तस्य मन्तव्ये च, पूर्णः आत्मविश्वासः, सकारात्मकता, जीवनता च प्रतिपलम् अवलोकयितुं शक्यते |

मित्राणि, अस्माकं चिकित्सकाः उपचर्यादलानि, स्वच्छताकर्मिणः, आरक्षिणः, जनसञ्चारमित्राणि - एते सर्वे यत्सेवाकार्यं कुर्वन्ति, तस्य चर्चा मया नैकवारं कृतास्ति। 'मनोगतमि'त्यस्य माध्यमेनापि अहं तद्विषये कथितवान् । सेवायामेव स्वीयं सर्वस्वं समर्पयितुकामानां जनानां संख्या अपरिमितास्ति।

एतादृशः एव सज्जनः तमिलनाडोः के.सी.मोहनः अस्ति। के.सी.मोहनः मदुरै-नगरे एकं नापितापणं सञ्चालयति। महत्-श्रमेण तेन स्वीय-पुत्र्याः शिक्षायै पञ्च-लक्षरूप्यकाणि सञ्चितानि आसन्; परं पूर्णैषा राशिः तेन अस्यां विपदायाम् अर्थिणां निर्धनानां च सेवायै व्ययीकृता।

एवमेव अगरतला-नगरे, गौतमदासः हस्तवाह्यापणेन स्वीय-दैनिकोपार्जनस्य सञ्चयेन अर्थिभ्यः सूपम् ओदनं च क्रीत्वा भोजनं उपपादयति।

पञ्जाबस्य पठानकोटतः अपि ईदृशमेव उदाहररणं मया अभिज्ञातम् । अत्र राजू-नाम्ना दिव्यांग-भ्रात्रा अन्येषां साहाय्येन सञ्चितेन स्वल्पधनेन त्रिसहस्राधिकानि मुखाच्छादनानि कारयित्वा वितरितानि। राजू-भ्रात्रा अस्मिन् कठिनसमये प्रायशः शताधिक-कुटुम्बेभ्यः भोज्यमपि प्रापितम्।

देशस्य सर्वेभ्यः क्षेत्रेभ्यः महिला-स्वयंसेवा-समूहानां परिश्रमस्यापि अनेकाः कथाः समक्षमागच्छन्ति। ग्रामेषु, पुरेषु चास्माकं भगिन्यः पुत्र्यश्च प्रतिदिनं सहस्राधिकानि मुखाच्छादनानि सज्जीकुर्वन्ति । नैकाः सामाजिक-संस्थाः अपि अस्मिन् कार्ये सहयोगं कुर्वन्ति।

मित्राणि, ईदृशाः बहवो दृष्टान्ताः प्रतिदिनं दृश्यन्ते श्रूयन्ते च। बहवो जनाः मां 'नमोएप'-इत्येतैः अन्यैश्च माध्यमैः स्वीय-प्रयासानां विषये सूचयन्ति।

अनेकशः समयाभाव-कारणेनाहं बहूनां जनानां संघटनानां संस्थानां वा नामोल्लेखं कर्तुं न पारयामि। सेवाभावेन जनानां साहाय्यकर्तृणाम् ईदृशानां सर्वेषामेव सेवां प्रत्यहं अतितरां श्लाघयामि, आदरं व्याहरामि, हृदयेन च तान् अभिनन्दामि।

मम प्रियाः देशवासिनः, अन्यदेकं वृत्तं येन मम हृदयं गहनतया स्पृष्टम्, तदस्ति सङ्कटमयेऽस्मिन् काले नवाचारः प्रभूतम् अभिवर्धमानोऽस्ति। सर्वे देशवासिनः ग्रामेभ्यः नगराणि यावत्, लघु-व्यापारिभ्यः स्टार्ट-अप्-पर्यन्तं, अस्मदीयाः प्रयोगशालाः चापि, कोरोना-संक्रमणं विरुध्य अस्माकं संघर्षे अभिनवान् सर्वथा नूतनान् चोपायान् समुपकल्पयन्ति नवाचारञ्च कुर्वन्ति।

एतेषु अन्यतमस्य नासिकस्य राजेन्द्र-यादवस्य उदाहरणं आह्लादकरमस्ति। राजेन्द्रः नासिकस्य सतना-ग्रामस्य कृषकः अस्ति। तेन स्वीयं ग्रामं कोरोना-संक्रमणात् रक्षितुं ट्रैक्टर-इति कृषित्र-यानेन योजयित्वा एकं निर्मलीकरण-यन्त्रं निर्मितम् । एतच्च नवाचारयन्त्रं प्रभाविरीत्या कार्यं निर्वहति।

एवमेवाहं सामाजिकमाध्यमेषु चित्राणि दृष्टवान् । कतिपयैः आपणिकैः द्वि-हस्तान्तरालं सुनिश्चेतुम् आपण-प्रान्तेषु बृहत्यः प्रणालिकाः स्थापिताः येषां शीर्षभागे ते पण्य-सामग्रीं स्थापयन्ति, अपरेण भागेन च ग्राहकाः तां गृह्णन्ति ।

अस्मिन्काले शिक्षाक्षेत्रेऽपि विशिष्टाः नवाचाराः शिक्षकैः छात्रैश्च सम्भूय विधीयमानाः दृश्यन्ते । ऑनलाइन- इति सद्यस्कं, चलचित्र-कक्षाश्चापि विविधोपायैः नवीक्रियन्ते।

कोरोना-निवारकौषधि-कृते अस्माकं प्रयोगशालासु यत्कार्यं प्रवर्तते तस्योपरि अखिलविश्वस्य दृष्टिः, अस्माकं च सर्वेषां आशा स्थापितास्ति।

कामपि परिस्थितिं परिवर्तयितुं इच्छाशक्त्या सम्भूय नवाचारस्योपरि महद्दायित्वं भवति। सहस्राधिकानां वर्षाणां मानवजातेर्यात्रा सततं नवाचारैः एव अस्मिन्नाधुनिके चरणे समागतास्ति। एवमेव महारोगमेनं विजेतुम् अस्माकम् एते नवाचाराः बृहदाधाराः सन्ति।

मित्राणि, कोरोना-संक्रमणं विरुध्य संघर्षस्य मार्गः सुदीर्घः अस्ति। ईदृशी आपद् यस्याः प्रतिकारः समग्रेऽपि विश्वे नास्ति, यस्याः कोऽपि पूर्वानुभवः न विद्यते, अस्यां परिस्थितौ नूतनानि समाह्वानानि एतैश्चोत्पादिताः समस्याः, वयमपि अनुभवामः। एवं विश्वस्य प्रत्येकस्मिन् कोरोना-प्रभावितदेशे भवति | एवं भारतमपि एतैः दुष्प्रभावैः अस्पृष्टं नास्ति। अस्माकं देशे कोऽपि तादृशः वर्गः नास्ति, यः काठिन्यं नाऽनुभवति, पीडितो वा नास्ति। अस्मिंश्च संकटे सर्वाधिकः आघातः अस्माकं निर्धनेषु कर्मकरेषु श्रमिकेषु चापतितः। तेषां कष्टं, व्यथा, पीडा च शब्दैः वर्णितुं न शक्यते। अस्मासु को नाम तादृशो नास्ति, यः तेषां अथवा तेषां परिवाराणां कष्टानि नाऽनुभवति। वयं सर्वे मिलित्वा एतत्कष्टं पीडां च सम्विभक्तुं प्रयतामहे अशेष-देशश्च प्रयास-निरतोऽस्ति । अस्माकं रेल-विभागीयाः कार्मिकाः अहोरात्रं संलग्नाः। केन्द्रं भवतु, राज्यानि वा स्थानीयसंस्थाः वा, प्रत्येकं आदिवसं

परिश्रमते । एते रेल-कर्मकराः एकतः अग्रिमपंक्तिस्थाः कोरोनायोद्धारः एव सन्ति। लक्षशः श्रमिकाणां रेलयानैः बसयानैच सुरक्षितं सन्नयनं, तेषां भोज्य-पानादीनां संयोजनं, प्रत्येकं जनपदे सङ्गरोध-केन्द्राणां व्यवस्था, सर्वेषां परीक्षणं, निरीक्षणं, उपचारादीनां व्यवस्था - चैतानि सर्वाणि कार्याणि सततं प्रभूतमात्रायां प्रचलन्ति। परं मित्राणि, यद्दृश्यं वयमद्य पश्यामः, तेन देशे अतीतकाले यज्जातं तस्यावलोकनस्य, अनागतस्य च कृते अधिगमस्य अवसरः अपि उपलब्धः। अद्य स्वीय-श्रमिकाणां कष्टेषु वयं देशस्य पूर्वीयभागस्य पीडामपि द्रष्टुं शक्नुमः। यस्मिन्पूर्वीयभागे देशस्य विकासक्षमतास्ति, यस्य श्रमिकाणां बाहुबले देशं नूतनोत्कर्षे स्थापयितुं सामर्थ्यमस्ति, तस्य पूर्वीयभारतस्य विकासः अत्यावश्यकः । पूर्वीयभारतस्य विकासेनैव देशस्य सन्तोलितः आर्थिकविकासः सम्भाव्यते । देशेन यदा मह्यं सेवावसरः प्रदत्तः, तदैव अस्माभिः पूर्वीयभारतस्य विकासः प्राथमिकतया प्रयतितः। अहं सन्तुष्टः अस्मि यद्विगतेषु वर्षेषु अस्यां दिशायां प्रभूतमाचरितम् । साम्प्रतं प्रवासि-श्रमिकानवेक्ष्य बहूनां पदानां उपस्थापनमावश्यकं जातम्, वयं च तस्यां दिशायां सततं अग्रेसरामः। यथा कुत्रचित् श्रमिकाणां कौशलाकलनं भवति, अनेके स्टार्ट-अप्-संस्थाः अस्मिन्नभियाने नियुक्ताः, प्रवासि-आयोगस्थापनस्य चर्चा भवति। एतदतिरिच्य केन्द्रसर्वकारेण सद्योविहितैः निर्णयैः अपि ग्रामेषु जीविका-स्वजीविका-लघूद्योग-सम्बद्धाः प्रभूत-सम्भावनाः उद्भूताः सन्ति। एते निर्णयाः एतासां परिस्थितीनां समाधानाय, अपि च, आत्मनिर्भर-भारताय सन्ति। यदि अस्माकं ग्रामाः आत्मनिर्भराः स्युः, अस्माकं उपनगराणि, राज्यानि जनपदाः च आत्मनिर्भराः स्युः, तर्हि अनेकासां समस्यानां तावत् रौद्ररूपं नाभविष्यत् यस्मिन् रूपे एताः अस्माकं सम्मुखं समुपस्थिताः सन्ति। परं तमसो ज्योतिः प्रति गमनं मानवस्वभावः अस्ति। प्रभूतानां समाह्वानानां मध्येऽपि एतदनुभूत्वाऽहं प्रसन्नः, यदात्मनिर्भर-भारतस्य विषये अद्य देशे व्यापकमन्थनं आरब्धम् । अस्याभियानस्य नेतृत्वं देशवासिनां हस्तेषु वर्तते। जनैः साम्प्रतं एतं

स्वीयाभियानत्वेन स्वीकर्तुं आरब्धमस्ति। अस्याभियानस्य नेतृत्वं देशवासिनः स्वीय-हस्तेषु गृह्णन्ति। बहुभिः जनैः सूचितम् यत्तैः स्वीय-परिवेशे उत्पाद्यमानानं पण्यानां सूचिः निर्मितास्ति। एते जनाः साम्प्रतं एतेषां स्थानीयोत्पादानामेव क्रयं कुर्वन्ति अपि च 'वॉकल फॉर लोकल' इति भावं प्रायोजितमपि कुर्वन्ति। 'मेक् इन् इण्डिया' - इत्यस्य सम्वर्धनाय सर्वे स्वीयसंकल्पं प्रदर्शयन्ति।

बिहारस्य अस्माकं मित्रेण श्रीमता हिमांशुना 'नमोएप्' उपरि लिखितं यदसौ तद्दिनं द्रष्टुमिच्छति यदा भारतं विदेशेभ्यः आयातं न्यूनान्न्यूनं करिष्यति। कामं शिलातैल-डीज़ल-तैलेन्धनानां आयातं भवेत्, वैद्युदाण्विक-वस्तूनाम्, उर्वरकाणां खाद्यतैलानाम् आयातं वा भवेत् । अहं तेषां भावनाः जानामि। अस्माकं देशे असंख्याकाः ईदृशाः उत्पादाः आयात्यन्ते येषु अस्माकं प्रामाणिक-करदातृणां धनस्य व्ययो भवति, येषां च विकल्पं वयं सरलतया भारते सन्धातुं शक्नुमः।

असमस्य सुदीपेन मह्यं लिखितं यदसौ महिलाभिः निर्मितानां क्षेत्रीय-वंशोत्पादानां व्यापारं करोति तेन च निर्णीतमस्ति यदागामिषु द्विवर्षेषु स्वीयं वंशोत्पादानां वैश्विकाधारम् असौ स्थापयिष्यति। अहं विश्वस्तोऽस्मि यदात्मनिर्भर-भारतमित्यभियानं एतस्मिन्दशके देशं नूतनोत्कर्षे नेष्यति।

मम प्रियाः देशवासिनः, कोरोनासंकटस्य अस्मिन्काले विश्वस्यानेकैः नेतृभिः साकं मम चर्चा जाता। परमहम् एकं रहस्यम् अद्यावश्यं प्रकाशयितुमिच्छामि। विश्वस्यानेकैः नेतृभिः सह यदा सम्भाषणं भवति तदा मयाऽनुभूतं यदद्यत्वे तेषां अत्यधिका रुचिः योगायुर्वेदादिषु विषयेषु भवति। कतिपय-नेतारः मामपृच्छन् यत्कोरोनासंकटस्य अस्मिन्काले 'योगः' 'आयुर्वेदश्च' कथं सहायकौ भवितुमर्हतः।

मित्राणि, आन्ताराष्ट्रियः योग दिवसः शीघ्रमेव आगम्यमानोऽस्ति। 'योगः' यदा जनानां जीवनैः सम्बद्धः भवति तदा तेषु स्वीयं स्वास्थ्यं प्रति जागर्तिः सततं

वर्धते । साम्प्रतं कोरोना-संकटकाले एतद्-दृश्यते यत् हॉलीवुड्तः हरिद्वारं यावत् गृहे स्थिताः जनाः योगं प्रति गभीरावधानम् अर्पयन्ति। सर्वत्र जनैः योगेन साकं आयुर्वेद-विषये अधिकाधिक-ज्ञानस्य प्रयोगस्य च इच्छा प्रकाशिताऽस्ति । बहवो जनाः, यैः कदापि योगाभ्यासः न कृतः तेऽपि ऑनलाइन- सद्यस्कम् अथवा चलचित्र-माध्यमेन योगम् आचरन्ति। वस्तुतः योगः - community, immunity,unity - इति समुदायस्य, प्रतिरोधक-क्षमतायाः ऐक्यस्य च कृते सर्वथा कल्याणकारी ।

मित्राणि! कोरोना-सङ्कटमये काले अद्य योगः अत एव अधिकमहत्त्वपूर्णः यतो हि विषाणुः अयम् अस्माकं श्वसनप्रणालीम् आधिक्येन दुष्प्रभावयति। योगे तु श्वसनप्रणालीं सुद्रढयितुं विविध-प्राणायामाः सन्ति, येषां प्रभावं वयं सुदीर्घकालात् परिपश्यन्तः स्मः। इमे समय-परीक्षिताः प्रविधि-स्वरूपाः सन्ति, येषां स्वीयम् अद्वितीयं महत्त्वं वर्तते। 'कपालभाती' 'अनुलोम-विलोम- 'प्राणायामः' इत्येतेषां विषये तु अधिकाधिकजनाः पूर्वतः परिचिताः एव भवेयुः परं 'भस्त्रिका' , 'शीतली' , 'भ्रामरी' इत्येतादृशाः अन्ये अपि नैके प्राणायामाः सन्ति, येषां बहुविधाः लाभाः सन्ति ।

तावद् भवदीये जीवने योगं प्रवर्धयितुं आयुषमन्त्रालयेन रम्यः एकः प्रयोगः प्रवर्तितः । आयुषमन्त्रालयेन 'My Life, My Yoga' इत्याख्यायाः आन्ताराष्ट्रियस्तरीयायाः अन्तर्जालीय-दृश्याङ्कित-सामग्री-सङ्कुल-विनिर्मितेः प्रतियोगिता आरब्धास्ति। न अधिभारतम् एव, अपितु अधिविश्वं समे अपि जनाः अस्यां प्रतियोगितायां भागं गृहीतुं शक्नुयुः। अत्र प्रतिभागितां कर्तुं भवता विनिर्मितस्य मिनिट्-त्रयावधिकस्य दृश्याङ्कनस्य अध्यन्तर्जालम् उपस्थापनं कर्तव्यम्। अस्मिन् दृश्याङ्कने भवद्भिः योगः आसनादिकं वा प्रदर्शयद्भिः स्वस्वजीवने आगतस्य परिवर्तनस्य विषये वक्तव्यम् अपि।

ममायम् अनुरोधः भवद्भ्यः सर्वेभ्यः यत् भवद्भिः सर्वैः प्रतियोगितायाम् अस्यां भागः ग्रहणीयः, सोऽपि अनेन नवेन नयेन आन्ताराष्ट्रियययोगदिवसे प्रतिभागितया।

मित्राणि! अस्माकं देशे कोटिकोटिनिर्धनजनाः नैकदशक-वर्षावधेः अस्यां चिन्तागह्वरे स्थिताः सन्तः जीवनं यापयन्तः सन्ति यत् ते यदि अस्वस्थाः भवेयुः तदा किं स्वचिकित्सां कारयेयुः, ते अथवा स्वकुटुम्बस्य भोजनव्यवस्थाविषये चिन्तयेयुः वा इति। इमाम् एव सङ्घर्षस्थितिम् अवगम्य चिन्ताम् एनाम् अपाकर्तुं प्रायः सार्धैकवर्षपूर्वम् 'आयुष्मान् भारत' इत्याख्या योजना आरब्धा। कतिभ्यश्चित् वर्षेभ्यः पूर्वमेव 'आयुष्मान्  भारत'-योजनायाः लाभार्थिसङ्ख्या एककोटिमानमपि लङ्घितवती। एककोटितः अपि अधिकाः रुग्णाः अर्थात् देशस्य एककोटितः अपि अधिककुटुम्बानां सेवा-सम्पादनम्। एककोटितः अधिकरुग्णानां सङ्ख्या अर्थाद् नॉर्वे-सिङ्गापुर-रूपदेशयोः यावती जनसङ्ख्या ततः अपि द्विगुणितायाः जनसंख्यायाः, विना शुल्कं चिकित्सासौविध्यं प्रदत्तम् अस्ति। निर्धनजनाः चिकित्सालयप्रवेशात् परं चिकित्सासौविध्यम् आप्तुं शुल्कम् अदास्यन्, तदा अनुमीयते यद् प्रायः चतुर्दशसहस्रकोटिरूप्यकेभ्यः अपि अधिकराशेः व्ययः स्वपक्षतः सर्वे अकरिष्यन्। 'आयुष्मान् भारत' -योजनया निर्धजनानां धनं संरक्षितीकृतम्। अहम् आयुष्मान् भारत-योजनायाः सर्वलाभार्थिभिः सह रुग्णजनानाम् उपचार-कर्मणि सेवापरेभ्यः सर्वेभ्यः चिकित्सक-परिचारिका-कार्यनिष्पादक-गणेभ्यश्च वर्धापनानि प्रख्यापयामि। 'आयुष्मान् भारत'-योजनायाः अन्यतमं बृहद् वैशिष्ट्यम् एकं सुवाह्यता-स्वरूपान्वयनम् इति। अनया सुवाह्यतया देशान्तर्गतम् ऐक्यभावं प्रवर्धयितुम् अपि भूयः साहाय्यं प्रदत्तम् अर्थाद् बिहारस्य कश्चन निर्धनो जनः यदि अभिलषेत तदा समम् एव चिकित्सासौविध्यम् असौ कर्णाटकेऽपि आप्नुयाद् यत् तेन स्वराज्ये लभ्यमानं भवेत्। अनया एव रीत्या महाराष्ट्रस्य कश्चन निर्धनः समानम् एव चिकित्सासौविध्यं तमिलनाडौ अपि प्राप्नोति। एतद्योजनाकारणात् कस्मिन् अपि

क्षेत्रे यत्र चिकित्सासौविध्यं सुदृढं न स्यात्, तत्रत्याः निर्धनजनाः देशस्य कस्मिंश्चिद् अपि भागे गत्वा उत्तमचिकित्सासौविध्यं प्राप्नुवन्तः सन्ति।

मित्राणि ! भवन्तः ज्ञात्वा आश्चर्यचकितान्विताः भविष्यन्ति यत् एककोटिलाभार्थिषु अशीतिप्रतिशतं लाभार्थिनः देशस्य ग्रामीणक्षेत्रीयाः नागरिकाः सन्ति । अशीतिप्रतिशतपरेषु लाभार्थिष्वपि प्रायः पञ्चाशत्प्रतिशत-पराः अस्माकं मातरः भगिन्यः पुत्र्यः च वर्तन्ते । एषु लाभार्थिषु अत्यधिकाः तादृशैः रोगैः ग्रस्ताः आसन् येषां सामान्यौषधैः उपचारः कर्तुं नैव शक्यते । एषु सप्ततिप्रतिशत-पराणां जनानां शल्यचिकित्सा अजायत । भवन्तः अनुमातुं शक्नुवन्ति यत् कियद्दुःखपूर्णां स्थितिं सम्मुखीकुर्वाणाः एते जनाः रोगान्मुक्ताः जाताः। मणिपुरस्य चुरा-चाँदपुरे षड्वर्षीयबालेन केलेनसाङ्ग्-इत्यनेन अपि अनया योजनया अभिनवं जीवनं प्राप्तम् । केलेनसाङ्ग् अतिलघुवयसा गभीरमस्तिष्करोगेण ग्रस्तः आसीत् । अस्य बालस्य पिता दैनन्दिनश्रमिकः, माता च तन्तुवयनं करोति । अस्यां परिस्थितौ बालकस्य उपचाराय काठिन्यम् अनुभूयते स्म । किन्तु 'आयुष्मान् भारत'-योजनान्तर्गतं तयोः पुत्रस्य उपचारः जातः । प्रायः एतादृशः अनुभवः पुडुचेर्याः अमूर्था-वल्ली-वर्यायाः वर्तते । तत्कृते अपि 'आयुष्मान् भारत'-योजना सङ्कटमोचिका सम्वृत्ता । तस्याः पतिः हृदयाघातेन मृत्युमुपगतः एवञ्च तस्याः सप्तविंशतिवर्षीयः पुत्रः जीवा अपि हृदयरोगं सम्मुखीकुरुते । चिकित्सकैः तत्कृते शल्यचिकित्सा परामृष्टा किन्तु दैनन्दिन-श्रमिकाय जीवा इत्यस्मै शल्यचिकित्सायाः व्यय-वहनम् असम्भवम् इव आसीत् । किन्तु अमूर्था वल्ल्या स्वपुत्रस्य जीवा इत्यस्य पञ्जीकरणं 'आयुष्मान् भारत'-योजनायां कारितम्, नवदिनाभ्यन्तरे तस्य हृदयसम्बद्धा शल्यचिकित्सा पूर्णताङ्गता।

मित्राणि!, अहं भवद्भ्यः केवलं तिस्रः चतस्रः घटनाः अकथयम्। 'आयुष्मान् भारत ' -योजनया तु एतादृश्यः कोटितः अधिकाः कथाः संयुक्ताः सन्ति। इमाः कथाः

जीवतां - जागरूकाणां मनुष्याणां सन्ति, दुःख-व्यथाभ्यः मुक्तानाम् अस्माकं स्वकीयानां परिवारजनानाम् सन्ति। भवद्भ्यः मम आग्रहः वर्त्तते, कदापि समय: मिलेत् चेत् तादृशेन जनेन अवश्यं सम्वादः विधेयः, येन 'आयुष्मान् भारत' - योजनायाः अन्तर्गतं स्वकीया चिकित्सा कारिता भवेत्। भवन्तः प्राप्स्यन्ति यत् यदा एक: निर्धनः चिकित्सायाः बहिः आगच्छति, चेत् तस्मिन् निर्धनत्वं विरुध्य युद्धस्य अपि शक्तेः आगमनं प्रतीयते। अन्यद् अहम्, अस्माकं देशस्य नैष्ठिकेभ्यः आर्थिकम् ऋणं प्रदातृभ्यः कथयितुं वाञ्छामि। 'आयुष्मान् भारत' - योजनायाः अन्तर्गतं येषां निर्धनानां चिकित्सा विना शुल्कम् अभवत्, तेषां जीवने यत् सुखम् आगच्छत्, सन्तोष: अमिलत्, तस्य पुण्यस्य सत्यतायां प्रतिभागिनः भवन्तः अपि सन्ति, अस्माकं नैष्ठिकाः करप्रदातारः अपि अस्य पुण्यस्य भागिनः सन्ति।

मम प्रियाः देशवासिनः! एकस्मिन् पक्षे यत्र वयं महामारीं विरुध्य युध्यामहे, तत्र द्वितीयस्मिन् पक्षे, अस्माभि:, एतत्काले एव पूर्वभारतस्य केषुचिद् भागेषु, प्राकृतिक्याः आपद: अपि साम्मुख्यं करणीयं भवति। विगतेषु सप्ताहेषु वयं पश्चिमबङ्गाले ओडिशायां च भीषणस्य अम्फान-झञ्झावातस्य अतिशयेन विकरालम् प्रभावम् अपश्याम। झञ्झावातेन अनेकानि गृहाणि अनश्यन्। कृषकाणाम् अपि हानिः अभवत्। स्थितेः परीक्षणाय अहं विगते सप्ताहे ओडिशां पश्चिमबङ्गालं च अगच्छम्। पश्चिमबङ्गालस्य ओडिशायाः च जनाः येन साहसेन वीरतया च स्थिते: साम्मुख्यम् अकुर्वन्  - प्रशंसनीयं वर्तते। संकटस्य अस्यां घटिकायां, देश: अपि, पूर्णतया तत्र स्थितैः जनैः सार्धं वर्त्तते।

सखायः!, एकस्मिन् पक्षे यत्र पूर्वभागस्थं भारतं झञ्झावातेन आगतायाः आपद: साम्मुख्यं करोति, तत्र एव द्वितीयस्मिन् पक्षे, देशस्य विभिन्नेषु भागेषु शलभानाम् आतङ्कमयेन आक्रमणेन जनाः दुष्प्रभाविताः सन्ति। अमीभिः आक्रमणै: पुनः वयम् एतत् स्मारिताः यत् इमे लघवः जीवाः कियन्तं विनाशं कुर्वन्ति। शलभानां

दलस्य आक्रमणम् अनेकानि दिनानि यावत् चलति, बहुविस्तृते क्षेत्रे अस्य प्रभावः भवति। भारतस्य सर्वकारः भवतु, राज्यस्य सर्वकारः स्यात्, कृषेः विभागः अस्तु, प्रशासनम् अपि अस्मात् संकटात् जन्यात् विनाशात् संरक्षणाय, कृषकाणां सहयोगाय, आधुनिकानां संसाधनानाम् उपयोगं करोति | नवेषु अपि आविष्कारेषु ध्यानं प्रदीयते, अन्यच्च अहं विश्वसिमि यत् वयं सर्वे मिलित्वा अस्माकं कृषिक्षेत्रेषु यदिदं संकटम् आगच्छत्, तस्मात् अपि योत्स्यामहे, बहु किमपि रक्षिष्यामः।

मम प्रियाः देशवासिनः!, केभ्यश्चित् दिवसेभ्यः पश्चात् एव जूनमासस्य पञ्चमे दिने समस्तम् अपि विश्वं 'विश्वपर्यावरण-दिवस' - इति आमानयिष्यति। 'विश्वपर्यावरण- दिवसस्य' अवसरे अस्य वर्षस्य विषयवस्तु अस्ति - Bio Diversity अर्थात् जैव-विविधिता । वर्तमानासु परिस्थितिषु एतद् विषयवस्तु विशेषरूपेण महत्वपूर्णम् अस्ति । सञ्चाररोधमये काले केषुचित् सप्ताहेषु जीवनस्य गतिः कथञ्चित् शिथिला मन्दा च अवश्यमेव अभवत्, परन्तु अनया वयं स्वसमीपे, प्रकृतेः समृद्धां विविधताम्, जैव-विविधतां च पार्श्वात् अवलोकनस्य अवसरान् अपि प्राप्नुमः ।अद्य कियन्तः अपि एतादृशः पक्षिण: सन्ति ये प्रदूषणे कोलाहले च लुप्ताः अभवन्, बहूनां दिवसानां पश्चात् तेषां कलरवः जनैः स्वीयेषु गेहेषु श्रूयते । अनेकेभ्यः स्थलेभ्यः, पशूनाम् उन्मुक्तत्वेन विचरणस्य वार्ताः अपि समक्षम् आगच्छन्ति। मम सदृशं भवन्तः सर्वे अपि सामाजिके संचारतन्त्रे अवश्यम् एव इमाः वार्त्ता: दृष्टवन्तः, श्रुतवन्तः वा भवेयुः | बहवः जनाः कथयन्ति, लिखन्ति, चित्राणि तन्त्रेषु स्थापयन्ति, यत् ते स्वकीयेभ्यः गृहेभ्यः दूर-सुदूर-पर्यन्तं शैलगिरीन् द्रष्टुं शक्नुवन्ति, दूर-सुदूर-पर्यन्तं द्योतमानां विद्युदम् अवलोकयन्ति | इमानि चित्राणि दृष्ट्वा, अनेकजनानां मनसि ये संकल्पाः उत्थिताः भविष्यन्ति यत् किं वयं तानि दृश्यानि एवम् एव स्थापयितुं शक्नुमः। एभिः चित्रैः जनेभ्यः प्रकृत्यै किमपि करणस्य प्रेरणा अपि प्रादीयत ।नद्यः सदा स्वच्छाः तिष्ठेयुः, पशु-पक्षिभ्यः अपि स्वतन्त्रतया जीवनाय अधिकारः अलभत,

आकाशम् अपि स्वच्छं तिष्ठतु, अस्य कृते वयं प्रकृत्या सह सङ्गतिं विधाय जीवनं यापयितुं प्रेरणां प्राप्तुम् अर्हामः।

मम प्रियाः देशवासिनः! वयं वारम्वारं शृणुमः 'जलमेव जीवनमिति - जलमस्ति चेद् भविष्यदस्ति, किन्तु जलस्य कृते अस्माकं दायित्वमप्यस्ति | वर्षाजलम्, वृष्टेः जलं चेति - अस्माभिः सुरक्षणीयम्, जलस्य प्रत्येकं बिन्दवः रक्षणीयाः | प्रतिग्रामं वर्षाजलं कथमस्माभिः संरक्ष्यम्? पारम्परिकाः अतिसरलाः सन्ति उपायाः, तैः सरलैः उपायैरपि वयं जलं रक्षितुं पारयामः । पञ्चसु सप्तसु वा दिनेष्वपि जलं रक्षितं भवति चेत् पृथ्वीमातुः पिपासा शान्ता भविता, जलं पुनः धरान्तरे गमिष्यति, तदेव जलम्, जीवनशक्तिरूपेण परिवर्तयिष्यति। अत एव, अस्मिन् वर्षर्तौ, अस्माकं समेषां प्रयासः जल-सुरक्षार्थं भवेत्। जलं च सुरक्षेम, जलस्य संरक्षणञ्च कुर्युः |

मम प्रियाः देशवासिनः! स्वच्छपर्यावरणं साक्षाद् अस्माकं जीवनस्य, अस्माकं सन्ततीनां भविष्यस्य च विषयो वर्त्तते । अस्मादेव, अस्माभिः व्यक्तिगतस्तरेऽपि अस्य चिन्ता विधेया । मम भवद्भ्यः अनुरोधोऽस्ति यत् अस्मिन् 'पर्यावरणदिवसे' भवन्तः कतिपयानां वृक्षाणाम् आरोपणमवश्यमेव कुर्वन्तु। अथ च प्रकृतिसेवायै कमपि संकल्पमवश्यमेव स्वीकुर्युः येन प्रकृत्या समं भवतां प्रतिदिनं सम्बन्धः भवेत् । आम्! घर्मः समेधमानः अस्ति, अतः, पक्षिणां कृते जलस्य प्रबन्धनमपि न विस्मरेयुः |

मित्राणि, अस्माभिः सर्वैः इदमपि ध्यातव्यमस्ति यत् एतावत्याः कठिन-तपस्यायाः अनन्तरं, इयत्काठिन्यानन्तरं, देशेन, येन प्रकारेण परिस्थितिः सम्भालिताऽस्ति, सा कथमपि नैव अनियन्त्रिता स्यात् । अस्माभिः युद्धमिदं दुर्बलतरं नैव विधेयम् । वयम् असावधानाः भवेम, सावधानतायाः त्यागं करवाम-इति नास्ति कश्चिदपि विकल्पः । कोरोना-संक्रमणं विरुध्य युद्धं साम्प्रतमपि

तावदेव गम्भीरमस्ति। भवते, भवत्परिवाराय च, साम्प्रतमपि कोरोना-विषाणुत: तथैव गम्भीरं सङ्कटं भवितुं शक्नोति ।अस्माभि:, समेषां जनानां जीवनं रक्षणीयमस्ति, अतः द्वि-गज़-परिमित-दूरताया:, मुखाच्छादक-धारणस्य, हस्तप्रक्षालनस्य चेत्यादीनां सावधानतोपायानां तथैव परिपालनं कर्तव्यं यथा अधुना यावत् कुर्वन्त: स्म:। अहं पूर्णतया प्रत्यैमि यत्, भवन्तः स्वस्मै, स्वकीयेभ्य:, निजदेशाय, इमान् सुरक्षा-सावधानतोपायान् नूनमेव पालयिष्यन्ति ।अनेन विश्वासेन, भवताम् उत्तम-स्वास्थ्याय, मदीया: हार्दिक्यः शुभकामनाः ।आगामि-मासे, पुनरेकवारं, 'मनोगतम्' - इति सम्वादं भूरि नूतन-विषयै: सार्धम् अवश्यमेव करिष्याम:| धन्यवाद: । *****

- [भाषान्तरं – सर्वश्री-डॉ.श्रुतिकान्तपाण्डेय-युवराजभट्टराई-नारायणदत्तमिश्रैः सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com